# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

| कक्षा- शास्त्री-३ (SEM-5) | प्रश्नपत्र-८ | गुणा: - ७० |
|---|---|---|
| विषयः- साहित्यम् | CE-3510 | समय: - ११ त: ०२ |
| दिनाङ्क: - ०२/१२/२०१६ | सन्दर्भग्रन्थ: - कादम्बरी ( महाश्वेतावृत्तान्त: ) | |

**॥ प्रथमान्विति: ॥**

**प्र-१ द्वयो: ससन्दर्भं व्याख्या कार्या । ०८**

१. तस्य च दक्षिणां मूर्त्तिमाश्रित्याभिमुखीमासीनाम्, उपरचितब्रह्मासनाम्, अतिविस्तारिणा सर्वदिङ्मुखप्लावकेन प्रलय-विप्लवक्षीरपयोधिपुरपाण्डुरेण अतिदीर्घकालसञ्चितेन तपोराशिनेव सर्वतो विसर्पता पादपान्तरैस्त्रिस्रोतोजलनिभेन पिण्डीभूय वहतेव देह प्रभावितानेन सगिरिकाननं चन्द्रमयमिव तं प्रदेशं कुर्वतीम् ।

२. अतिमधुरगीतावकृष्टैध्यानमिवाभ्यस्यद्भिर्निश्चलकर्णपुटैर्मृग-वराह-वानर-वारण-शरभ-सिंह प्रभृतिभिर्वनचरैराबद्ध-मण्डलैराकर्ण्यमांनगीतानुविपञ्ची-निर्घोषाम् अमरापगामिव न भसोऽवतीर्णाम् दीक्षितवावमिवाप्राकृताम्, त्रिपुरोरिशरशलाकामिव तेजोमयीम्, पातामृतामिवविगततृष्णाये ।

३. उत्क्षिप्य नीयमानेव तत्समीपमिन्द्रियै: पुरस्तादाकृप्यमाणेव हृदयेन, पृष्ठत: प्रेर्यमाणेव पुष्पधन्वना कथमपि मुक्तप्रयत्नमात्मनम् अधारयम् । अनन्तरञ्च मेऽन्तर्मदनेन अवकाशमिव दातुमाहितसन्ताना निरयु: श्वासमारुत: ।

**प्र-२ महाकवेर्बाणभट्टस्य कादम्बर्या: प्रकृतिसमीक्षणं क्रियताम् । ०८**

**अथवा**

**ग्रन्थोक्तदिशा महाश्वेताया: वर्णनं कुरुत ।**

**प्र-३ द्वयो: टिप्पणी लेख्या । ०४**

१. कादम्बर्या: वैशिष्ट्यम् ।
२. गद्यकाव्यस्य उद्भव: विकासश्च ।
३. महाश्वेतास्नानवर्णनम् ।
४. पुण्डरीकवर्णनम् ।

**प्र-४ पञ्चानामुत्तराणि लिखत । ०५**

१. कादम्बर्या: रचयिता क:?
२. बाणभट्टस्य का: रचना: सन्ति?
३. बाणभट्टस्य वंशस्य मूलपुरुषस्य किं नामासीत्?
४. महाश्वेतावृत्तान्तस्य नायिका का?
५. महाश्वेता कस्य पुत्री आसीत्?
६. किन्नरा: कस्मिन् पर्वते निवसन्ति स्म?
७. पुण्डरीकाय क: उपदेशं यच्छति?

**॥ द्वितीयान्विति: ॥**

**प्र-५ द्वयो: ससन्दर्भं व्याख्या कार्या । ०८**

१. इयञ्च सुरासुरैर्मध्यमानात् क्षीरसागरादुद्गत: पारिजातनाम पादपस्तस्य मञ्जरी । यथा चेषाव्रतविरुद्धमस्य श्रवण संसर्गमासादितवती, तदपि कथयामि । अद्य चतुर्दशीति भगवन्तमम्बिकापतिं कैलासगतमुपासितुममरलोकान्मया सह नन्दनवनसमीपेनाय मनुसरन्निर्गत्य साक्षान्मधुमासलक्ष्मीदत्तललितहस्तावलम्ब्या ।

२. किं दु:खमिदम्, किं सुखमिदम्, किमुत्कण्ठेयम्, किं व्याधिरयम्, किं व्यसनमिदम्, किमुत्सवौऽयम्, किं दिवस एव किं निशेयम्, कानि रम्याणि कान्यरम्याणीति सर्वञ्च नावगच्छम् । अविज्ञातमदनवृत्तान्ता च क्वगच्छामि, किं करोमि, किं श्रृणोमि, किं पश्यामि, किंमालपामि, कस्य कथयामि, कोऽस्य प्रतिकार इति सर्वञ्च नाज्ञासिषम् ।

३. मयोक्तम् एषा खलु भगवतः श्वेतभानोरंशु सम्भूतायाम् अप्सरसि गौर्यासमुत्पन्नो देवस्य सकलगन्धर्वमुकुट-मणिशलाकाशिखरोल्लेखमसृणितचरणनखचक्रस्य प्रणयप्रसुत्यगन्धर्वकामिनीकपोलपत्त्रलतालाञ्छितभुजतरुशिखरस्य पादपीठीकृतलक्ष्मीकरकमलस्य गन्धर्वादिपते हंसस्य दुहिता महाश्वेतानाम गन्धर्वाधिवासं हेमकूटालचम् अभिप्रस्थिता इति ।

**प्र-६ बाणस्य काव्यदृष्टिः ( प्रतिभा ) गद्यशैली च इत्यस्मिन् विषये आलोच्यताम् ।** **०८**

**अथवा**

**पुण्डरीकाय कपिञ्जलकृतोपदेशवर्णनम् ।**

**प्र-७ एकस्योपरि टिप्पणी लेख्या ।** **०२**

१. चंद्रोदयवर्णनम् ।

२. न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते ।

**प्र-८ द्वयोः लघूत्तराणि लिखत ।** **०२**

१. महाश्वेतायाः मातुः नाम किम्?

२. पुण्डरीकसखाः कः?

३. पारिजातवृक्षः कुत्र वर्तते?

**॥ तृतीयान्वितिः ॥**

**प्र-९ द्वयोः ससन्दर्भं व्याख्या कार्या ।** **०८**

१. यदा पुनः पुनः शास्त्रोपदेशविशदैः सनिदर्शनैः सेतिहासैश्च वचोभिः सानुनयं सोपग्रहञ्चाभिधीयमानोऽपि नाकरोत् कर्णे तदाहमचिन्तयम् अतिभूमिमर्थं गतः न शक्यते निवर्तयितुम् । इदानीं निरर्थकाः खलूपदेशोः तत्प्राणपरिक्षणेऽपि तावदस्य यत्नमाचरामि ।

२. असवश्चमे तस्मिन् क्षणे किमतिकठिनतया अस्य मूढहृदयस्य किमनेकदुःखसहस्रसहिष्णुतयाहतशरीरकस्य किं वहिततया दीर्घशोकस्य किं भाजनतया जन्मान्तोपात्तस्य दुष्कृतस्य किं दुःखदाननिपुणतया दग्धदैवस्य किमेकान्त वामतया दुरात्मनो मन्मथहतकस्य केन हेतुना नोद्गच्छन्ति स्म तदपि न ज्ञातवती ।

३. गते च ताते ततः प्रभृति तस्य जनस्याश्रुमोक्षपात्रेण कृतज्ञतां दर्शयन्ती तदनुरागकृशमिदमपुण्यबहुलमस्तमिव-लज्जमङ्गलभूतमनेकक्लेशायाससहस्रनिवासं दग्धशरीरकं बहुविधैर्नियमशतेः शोषयन्ती वन्यैश्च फलमूलवारिभिर्वर्तमाना जपव्याजेन तद् गुणगणानिवगणयन्ती त्रिसन्ध्यमत्र सरसि स्नानमुपस्पृशन्ती प्रतिदिन मर्चयन्ती देवं त्र्यम्बकम् अस्यामेव गृहायां तरलिकया सह दीर्घशोकमनुभवन्त्यवसम् ।

**प्र-१० ग्रन्थोक्तदिशामहाश्वेताविलापवर्णनं लिखत ।** **०८**

**अथवा**

**ग्रन्थानुसारं पुण्डरीकनिधने कपिञ्जलविलापवर्णनं कुरुत ।**

**प्र-११ द्वयोः टिप्पणी विधेया ।** **०४**

१. संध्यवर्णनम् ।

२. तरलिका ।

३. महाश्वेताभिसारवर्णनम् ।

४. चन्द्रापीडस्य महाश्वेतासान्त्वनम् ।

**प्र-१२ पञ्चप्रश्नाः एकवाक्येन समाधेयाः ।** **०५**

१. महाश्वेतावृत्तान्तस्य नायकः कः?

२. बाणभट्टस्य गुरोः नाम किम्?

३. त्र्यम्बक शब्दस्य कोऽर्थः?

४. चन्द्रापीडः कः?

५. तरलिका कस्य सखी आसीत्?

६. केनकारणेन पुण्डरीकस्य मरणम् अभवत्?

७. मकरकेतुः - इत्यस्य कोऽर्थः?